# संस्कृतवार्ता:

**दिनाङ्क :- 30.08.2024** **प्रातः - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री - मुम्बई-पालघर/ यात्रा**

प्रधानमन्त्री नरेन्द्रमोदी अद्य महाराष्ट्रस्य मुम्बई-पालघरयोः यात्रां करिष्यति। यात्रावधौ प्रधानमन्त्री पालघरस्य सिडको-उद्याने विभिन्नानां विकासपरियोजनानां उद्घाटनं, आधारशिला च स्थापयिष्यति । श्रीमोदी प्रायः षष्ठ्युत्तर पञ्चशताधिक एकसहस्र कोटिरूप्यकाणां व्ययेन निर्मितस्य अष्टादशाधिक द्विशतं यावत् मत्स्यपालनपरियोजनानां उद्घाटनं आधारशिलां च स्थापयिष्यति। सः मुम्बईनगरस्य जियो वर्ल्ड कन्वेन्शन सेण्टर् इत्यत्र चतुर्विंशत्यधिक द्विसहस्र तम् वर्षस्य ग्लोबल फिन्टेक् फेस्ट् इति कार्यक्रमम् अपि सम्बोधयिष्यति। ह्यः पालघरे वार्ताहरान सम्बोधयन् केन्द्रीयपत्तन-नौकायान-जलमार्गमन्त्री सर्वानन्दसोनोवालः अवदत् यत् वधावन-पत्तनम् राज्यस्य देशस्य च विशिष्टपरिचयं करिष्यति। अपरपक्षे प्रधानमन्त्री अद्य केरलस्य अलप्पुझानगरे अर्थुङ्गल-मत्स्यपत्तन् निर्माणस्य तृतीयचरणस्य उद्घाटनं आभासीय माध्यमेन करिष्यति।

**INS अरिघात**

ह्यः विशाखापत्तनमनगरे रक्षामन्त्रिण: राजनाथसिंहस्य उपस्थितौ द्वितीयं अरिहन्तवर्गस्य जलमग्न पोतं 'INS अरिघाट' इति भारतीयनौसेनायां समाविष्टम। रक्षामन्त्री स्वसम्बोधने विश्वासं प्रकटितवान् यत् 'अरिघात' भारतस्य परमाणुत्रिकं अधिकं सुदृढं करिष्यति, परमाणुनिरोधं वर्धयिष्यति, क्षेत्रे सामरिकसमन्वयम् शान्तिं च स्थापयितुं साहाय्यं करिष्यति तथा च देशस्य सुरक्षायां निर्णायकभूमिकां निर्वहति। आईएनएस अरिघाटस्य निर्माणे उन्नतप्रौद्योगिकी, विशिष्टसामग्री, अत्यन्तं कुशलं निर्माणशैली च आसीत् ।आईएनएस अरिहन्तस्य, आईएनएस अरिघाटस्य च उपस्थितौ भारतस्य सम्भाव्यविरोधिनां निवारणस्य, राष्ट्रहितस्य रक्षणस्य च क्षमता वर्धते।

**त्रिपुरा-प्राकृतिक आपदा**

त्रिपुरा-सर्वकारेण सम्पूर्णं राज्यं प्राकृतिक-आपद-प्रभावित-क्षेत्रम् इति घोषितम्, यद्यपि अन्ता-मन्त्रालय-केन्द्रीय-दलम् अत्यन्तं प्रभावितेषु स्थानेषु मूल्याङ्कनं कुर्वदस्ति। गोमती-दक्षिणत्रिपुरा-मण्डलयोः प्रभावित स्थले एव निरीक्षणं आरब्धम् अन्ता-मन्त्रालय-केन्द्रीय-दलः - अद्य खोवाई-सेपाहिजाला-मण्डलयोः भ्रमणं करिष्यति योहि वर्षा-जलाप्लावेन च प्रभविताः | अन्तिमसूचनाम् प्राप्तिम् यावत् द्वात्रिंशत् जनाः स्वप्राणान् त्यक्तवन्तः। एतस्मिन् समये जलाप्लवेन जलसम्पदः दूषिताः सन्ति, अतः जलजन्यरोगस्य प्रकोपस्य च अधिक सम्भावना विद्यते स्वास्थ्यविभागः स्वास्थ्यशिबिराणां संचालनं निरन्तरं कुर्वन् अस्ति। अपि च, पेयजलम् स्वच्छताविभागेन जलजन्यरोगाणां समाह्वानानि न्यूनीकर्तुं अपशिष्टानां सुरक्षितनिष्कासनं सुनिश्चित्य मानकसञ्चालनप्रक्रियाः इति निर्गताः सन्ति।

**फिच रेटिंग्स**

फिच रेटिंग्स इत्यनेन भारतस्य सार्वभौम-ऋणस्य रेटिंग् 'बीबीबी माइनस' इति स्थिर-दृष्टिकोणेन पुनः यथावदेव संस्थापिता। वैश्विक-रेटिंग् एजेन्सी इत्यनेन अद्य प्रकाशिते प्रतिवेदने देशस्य सुदृढ-मध्यमकालीन-वृद्धि-संभावनायाः, सुदृढ-बाह्य-वित्तस्थितेः च श्रेयः प्रदत्तः। फिच् इत्यनेन भारतस्य सकल-राष्ट्रीय-उत्पादवृद्धिः वित्तीयवर्षे पञ्चविंशत्यधिक द्विसहस्र तमे वर्षे सप्त दशमलव द्वि प्रतिशतं, षड्विंशत्यधिक द्विसहस्र तमे वित्तीयवर्षे षड् दशमलव पञ्च प्रतिशतं च इति अनुमानितम्।

**पेरिस् पैरालम्पिक्स्**

पेरिस् पैरालम्पिक्स् इति क्रीडा कुम्भे भारतीयमिश्रितसङ्कुलम् शीतलदेवी-राकेशकुमारयोः लक्ष्यभेद-दलेन नवनवत्यधिक त्रयोदश-शतम् इति संयुक्त-अङ्कैः नूतनः पैरालम्पिक- किर्तिमानं निर्मितम्। उभौ आगामिमासस्य द्वितीये दिनांके शीर्ष-क्रिडकत्वेन प्रागुपांत्यचक्रीय-क्रीडायां प्रविष्टवन्तौ।

**॥ इति वार्ताः॥**